
तृतीयः पाठः

# मूर्खमित्रम्

(लङ्लकारः)

एकस्मिन् नगरे एकः नृपः आसीत्। तस्य भवने बहवः पशवः आसन्। ते नृपस्य सेवाम् अकुर्वन्। तेषु पशुषु एकः वानरः अपि तस्य प्रियः अभवत् ।



एकदा नृपः सुप्तः आसीत्। तदा सः वानरः व्यजनेन तम् अवीजयत्। तस्मिन् काले एका मक्षिका नृपस्य नासिकायाः उपरि उपाविशत् । वानरः वारं वारं तां मक्षिकां व्यजनेन न्यवारयत् तथापि सा मक्षिका पुनः पुनः आगत्य तत्रैव अतिष्ठत् । तेन सः वानरः क्रुद्धः अभवत्। तां मक्षिकां हन्तुं सः खड्गेन प्रहारम् अकरोत् । मक्षिका तु उड्डीय दूरम् अगच्छत्, किन्तु प्रहारेण नृपस्य नासिका छिन्ना अभवत् ।

अतः मूर्खजनैः सह मित्रता नोचिता ।

## शब्दार्थ

नृपः=राजा। बहवः = बहुत। एकदा = एक समय ( एक बार) । व्यजनेन = पंखे से। अवीजयत् = हवा कर रहा था। मक्षिका = मक्खी। हन्तुम् = मारने के लिए। खड्गेन = खड्ग से (तलवार से)। न्यवारयत् = हटाया। उड्डीय = उड़कर। नासिका = नाक ।

## अभ्यास

1. उच्चारण करें-

पशुषु व्यजनेन अवीजयत्

क्रुद्धः खड्गेन उड्डीय

2. एक पद में उत्तर दें-

(क) कस्य भवने पशवः आसन् ?

(ख) कः पशुः राज्ञः प्रियः आसीत् ?

(ग) नृपस्य नासिकायाः उपरि का उपाविशत् ?

(घ) वानरः कां हन्तुं खड्गेन प्रहारम् अकरोत् ?

(ङ) कस्य नासिका छिन्ना अभवत् ?

3. पाठ के उचित शब्दों से रिक्त स्थानों की पूर्ति करें-

(क) ...................... नगरे एकः नृपः आसीत् ।

(ख) एकदा नृपः .............................. आसीत् ।

(ग) मक्षिका पुनः पुनः .............................. तत्रैव अतिष्ठत् ।

(घ) मूर्खजनैः .............................. नोचिता ।

(ङ) .............................. व्यजनेन नृपम् अवीजयत् ।

4. संस्कृत में अनुवाद करें-

(क) पशु राजा की सेवा करते थे।

(ख) एक बार राजा सोये हुए थे ।

(ग) मक्खी उड़ कर दूर चली गयी ।

(घ) उसने तलवार से नाक पर प्रहार किया ।

5. भूतकाल में लङ्लकार का प्रयोग होता है, जैसे- आसीत् (था), 'अस्' धातु,

लङ्लकार, प्रथम पुरुष एकवचन। इस पाठ में प्रयुक्त लङ्लकार के रूपों को ढूँढ़कर लिखें।

शिक्षण-संकेत -

1. भू, वद्, गम् धातुओं का लङ्लकार में रूप लिखवाएँ ।

2. इस प्रकार की कोई अन्य कहानी हिन्दी में लिखकर दिखाने को कहें ।

आज्ञा गुरूणां ह्यविचारणीया ।